# 2020

## SANSKRIT — HONOURS

**Paper : CC-7**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**(Marks : 10)**

**Unit - II**

**1.** अधोलिखितयोः ***कस्यचित् एकस्य*** संस्कृतभाषया देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या। 6

(a) अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
एतं सामाजिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः।।

(b) श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्।।

**2.** अधोलिखितेषु ***प्रश्नद्वयम्*** अतिसंक्षेपेण संस्कृतभाषया देवनागरलिप्या च समाधेयम्। 2×2

(a) मिताक्षराकारेण उक्तेषु षड्विधस्मार्तधर्मविषयेषु द्वितीयः कः? सोदाहरणमुल्लिख्यताम्।

(b) आचार्येण याज्ञवल्क्येन उक्तानि धर्मस्थानानि कानि?

(c) ''पुराणन्यायमीमांसा'' – इत्यत्र 'न्यायमीमांसा' इति पदांशेन किम् बुध्यते?

(d) ''न हिंस्यात् सर्वा भूतानि'' – कस्मिन् प्रसङ्गे केन उक्तमिदम्?

**Section - B**

**(Marks : 30)**

**Unit - I & II**

**3.** अधोलिखितयोः यथेच्छं ***कस्यचित् एकस्य*** उत्तरं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्।

(a) कुतः स्विद्ब्राह्मणो जातो वर्णाश्चापि कुतस्त्रयः।
कस्माच्च भवति श्रेष्ठस्तन्मे व्याख्यातुमर्हसि।।

– अत्र प्रश्नकर्ता कः? कुत्र अस्ति अयं श्लोकः? अस्मिन् विषये प्राचीना भावना कुत्र परिदृश्यते? चतुर्णां वर्णानां वृत्तयः का आसन् तत् महाभारतमनुस्मृत्य पर्यालोचनं कुरु। 1+1+2+6

(b) ''कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥''

– कुत्र उपलभ्यते वचनमिदम्? केन वा उक्रमिदम्? स्वभावप्रभवैः गुणैः चतुर्णां वर्णानां कर्मविभागः श्रीमद्भगवद्गीतामनुसृत्य वर्ण्यताम्। 1+1+8

**4.** अतिसंक्षिप्ततया निम्नप्रदत्तेषु ***प्रश्नद्वयं*** समाधेयम् (न्यूनत ***एकस्य*** उत्तरं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्)। 1×2

(a) जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा – 'जात्युत्कर्षः' इति पदेन कोऽवबुध्यते?

(b) शूद्रायां ब्राह्मणाज्जातः पुत्रः महाभारते कः उच्यते?

(c) 'सोमक्रियापरः' कः वर्णः आसीत्?

(d) महाभारते 'वैदेहक' इति पदेन कोऽवबुध्यते?

## Unit - III & IV

**5.** ''प्रीत्यर्थं लोकयात्राया पश्यतः स्त्रीनिवन्धनम्''

– अत्र को वक्ता? लोकयात्राया निर्वाहे नारीणाम् अवदानं महाभारतमनुसृत्य आलोच्यताम्। नारीषु यथोचितं सम्मानादिकं कथं प्रदर्शनीयम्? 1+4+5

***अथवा***

''सम्मान्यमानाश्चैता हि सर्वकार्याण्यवाप्स्यथ'' – इति कुत्र उपलभ्यते? वचनस्यास्य तात्पर्यम् आलोच्यताम्। 10

**6.** अधोलिखितेषु ***विषयद्वयम्*** अधिकृत्य संक्षिप्ता टीका कार्या। 4×2

(a) गार्हस्थ्याश्रमः

(b) गोदानविधिः

(c) अन्नप्रासनसंस्कारः

(d) समावर्तनम्।

## Section – C

### (Marks : 10)

### Unit - I

**7.** अधोलिखितेषु यथेच्छम् ***एकस्य*** संस्कृतभाषया देवनागर्या लिप्या च व्याख्या कार्या। 6

(a) ध्रु॒वा द्यौर्ध्रु॒वा पृ॑थि॒वी ध्रु॒वास॒ः पर्व॑ता इ॒मे।

ध्रु॒वं विश्व॑मि॒दं जग॑द्ध्रु॒वो राजा॑ वि॒शाम॒यम्॥

(b) अ॒स॒प॒त्नः स॑पत्न॒हाऽभिरा॑ष्ट्रो विषास॒हिः।

य॒थाहमे॒षां भू॒तानां॑ वि॒राजा॑नि जन॑स्य च॥

**8.** अधोलिखितेषु यथेच्छं ***प्रश्नचतुष्टयस्य*** उत्तरम् अतिसंक्षेपेण प्रदीयताम् (एतेषु न्यूनत ***एकस्यो***त्तरं संस्कृतभाषया देवनागरलिप्या च लेखनीयम्)। 1×4

(a) अथर्ववेदोक्ताः राजकर्तारः के?

(b) 'पालागलः' इति पदेन किं बुध्यते?

(c) 'वज्जिवग्ग' इति पदं कुत्र केन प्रयुक्तम्?

(d) समितिरिति का?

(e) 'रत्निन्' इति पदस्य कोऽर्थः शतपथब्राह्मणे?

(f) "त्वां ________ वृणतां ________ त्वामिमाः" – इत्यत्र रिक्तस्थानद्वयं पूरयितव्यम्।

**Section - D**

**(Marks : 15)**

**Unit - I**

**9.** अधोलिखितेषु संस्कृतभाषया देवनागर्या लिप्या च ***एकः प्रश्नः*** समाधेयः।

(a) सप्ताङ्गराष्ट्रस्य सप्त अङ्गानि कानि? राज्ञः प्रज्ञागुणाः के? कौटिलीयार्थशास्त्रमनुसृत्य कोशदण्डसम्पत्द्वयम् आलोच्यताम्। 2+2+6

(b) राजमण्डलस्य प्रकृतयः काः? प्रकृतिषु मुख्यः कः? राजमण्डलस्य मूलप्रकृतयः आलोच्यन्ताम्। राजमण्डलस्य द्रव्यप्रकृतयः काः? 3+1+4+2

**10.** अधोलिखितेषु ***पञ्च प्रश्नाः*** समाधेयाः (न्यूनतया ***एकस्य*** उत्तरं संस्कृतभाषया देवनागर्या लिप्या च लेखनीयम्)। 1×5

(a) मन्त्रशक्तेः किं प्रयोजनम्?

(b) किं तावद् उपायचतुष्टयम्?

(c) यानासनयोः पार्थक्यम् उल्लिख्यताम्।

(d) शुक्रनीतिसारे सप्ताङ्गराष्ट्रस्य मुखं किम्?

(e) राजा भेदप्रयोगं कदा कुर्यात्?

(f) उपायचतुष्टयेषु अरीणां वशीकरणाय अन्तिमः उपायः कः अवलम्बनीयः?

(g) सन्धिः कतिविधः? तन्नाम लिख्यताम्।